# Vyasaproktam Surya Hridaya Stotram

# व्यासप्रोक्तं सूर्यहृदयस्तोत्रम्

## Document Information

Text title : Vyasaproktam Surya Hridaya Stotram

File name : vyAsaproktaMsUryahRRidayastotram.itx

Category : navagraha, hRidaya, stotra

Location : doc_z_misc_navagraha

Proofread by : PSA Easwaran

Description/comments : from Kurmapurana, kUrmapurANe uttarabhAge 18/33-49

Latest update : August 13, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 13, 2022

*sanskritdocuments.org*

# व्यासप्रोक्तं सूर्यहृदयस्तोत्रम्

व्यास उवाच ।
अथोपतिष्ठेदादित्यमुदयन्तं समाहितः ।
मन्त्रैस्तु विविधैः सौरै ऋग्यजुःसामसम्भवैः ॥ १॥

उपस्थाय महायोगं देवदेवं दिवाकरम् ।
कुर्वीत प्रणतिं भूमौ मूर्ध्ना तेनैव मन्त्रतः ॥ २॥

ॐ खद्योताय च शान्ताय कारणत्रयहेतवे ।
निवेदयामि चात्मानं नमस्ते ज्ञानरूपिणे ॥ ३॥

नमस्ते घृणिने तुभ्यं सूर्याय ब्रह्मरूपिणे ।
त्वमेव ब्रह्म परममापो ज्योती रसोऽमृतम् ।
भूर्भुवःस्वस्त्वमोङ्कारः शर्वरुद्रः सनातनः ॥ ४॥

पुरुषः सन्महोऽन्तस्थं प्रणमामि कपर्दिनम् ।
त्वमेव विश्वं बहुधा जात यज्जायते च यत् ।
नमो रुद्राय सूर्याय त्वामहं शरणं गतः ॥ ५॥

प्रचेतसे नमस्तुभ्यं नमो मीढुष्टमाय ते ।
नमो नमस्ते रुद्राय त्वामहं शरणं गतः ।
हिरण्यबाहवे तुभ्यं हिरण्यपतये नमः ॥ ६॥

अम्बिकापतये तुभ्यमुमायाः पतये नमः ।
नमोऽस्तु नीलग्रीवाय नमस्तुभ्यं पिनाकिने ॥ ७॥

विलोहिताय भर्गाय सहस्राक्षाय ते नमः ।
नमो हंसाय ते नित्यमादित्याय नमोऽस्तु ते ॥ ८॥

नमस्ते वज्रहस्ताय त्र्यम्बकाय नमो नमः ।
प्रपद्ये त्वां विरूपाक्षं महान्तं परमेश्वरम् ॥ ९॥

हिरण्मये गृहे गुप्तमात्मानं सर्वदेहिनाम् ।
नमस्यामि परं ज्योतिर्ब्रह्माणं त्वां परां गतिम् ॥ १०॥

विश्वं पशुपतिं भीमं नरनारीशरीरिणम् ।
नमः सूर्याय रुद्राय भास्वते परमेष्ठिने ॥ ११॥

उग्राय सर्वभक्षाय त्वां प्रपद्ये सदैव हि ।
एतद्वै सूर्यहृदयं जप्त्वा स्तवमनुत्तमम् ॥ १२॥

प्रातः कालेऽथ मध्याह्ने नमस्कुर्याद्दिवाकरम् ।
इदं पुत्राय शिष्याय धार्मिकाय द्विजातये ॥ १३॥

प्रदेयं सूर्यहृदयं ब्रह्मणा तु प्रदर्शितम् ।
सर्वपापप्रशमनं वेदसारसमुद्भवम् ।
ब्राह्मणानां हितं पुण्यमृषिसङ्घैर्निषेवितम् ॥ १४॥

अथागम्य गृहं विप्रः समाचम्य यथाविधि ।
प्रज्वाल्य वह्निं विधिवज्जुहुयाज्जातवेदसम् ॥ १५॥

ऋत्विक्पुत्रोऽथ पत्नी वा शिष्यो वाऽपि सहोदरः ।
प्राप्यानुज्ञां विशेषेण जुहुयुर्वा यताविधि ॥ १६॥

पवित्रपाणिः पूतात्मा शुक्लाम्बरधरः शुचिः ।
अनन्यमानसो वह्निं जुहुयात् संयतेन्द्रियः ॥ १७॥

इति कूर्मपुराणे उत्तरभागे अष्टादशाध्यायान्तर्गतं
व्यासप्रोक्तं सूर्यहृदयस्तोत्रं समाप्तम् ।
कूर्मपुराणे उत्तरभागे १८/३३-४९

Proofread by PSA Easwaran

*Vyasaproktam Surya Hridaya Stotram*
pdf was typeset on August 13, 2022

Please send corrections to *sanskrit@cheerful.com*